# Shri Rudrachandi Kavacham

# શ્રીરુદ્રચણ્ડી કવચમ્

## Document Information

Text title : rudrachaNDIkavacham

File name : rudrachaNDIkavacham.itx

Category : devii, kavacha, devI

Location : doc_devii

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari, NA

Description/comments : Rudrayamala tantra

Latest update : May 11, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીરુદ્રચણ્ડી કવચમ્

પૂર્વપીઠિકા -

શ્રીકાર્તિકેય ઉવાચ -

કવચં ચણ્ડિકાદેવ્યાઃ શ્રોતુમિચ્છામિ તે શિવ! ।
યદિ તેઽસ્તિ કૃપા નાથ! કથયસ્વ જગત્પ્રભો ! ॥ ૧॥

શ્રીશિવ ઉવાચ -

શ ૃણુ વત્સ ! પ્રવક્ષ્યામિ ચણ્ડિકાકવચમ્ શુભમ્ ।
ભુક્તિમુક્તિપ્રદાતારમાયુષ્યં સર્વકામદમ્ ॥ ૨॥

દુર્લભં સર્વદેવાનાં સર્વપાપનિવારણમ્ ।
મન્ત્રસિદ્ધિકરં પુંસાં જ્ઞાનસિદ્ધિકરં પરમ્ ॥ ૩॥

વિનિયોગઃ -

શ્રીરુદ્ર ચણ્ડિકાકવચસ્ય શ્રીભૈરવ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીચણ્ડિકા દેવતા,
ચતુર્વર્ગફલપ્રાપ્ત્યર્થં પાઠે વિનિયોગઃ ॥

ઋષ્યાદિ ન્યાસઃ -

શ્રીભૈરવ ઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીચણ્ડિકાદેવતાયૈ નમઃ હૃદિ ।
ચતુર્વર્ગફલપ્રાપ્ત્યર્થં પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

અથ કવચસ્તોત્રમ્ ।

ચણ્ડિકા મેઽગ્રતઃ પાતુ આગ્નેય્યાં ભવસુન્દરી ।
યામ્યાં પાતુ મહાદેવી નૈરૃત્યાં પાતુ પાર્વતી ॥ ૧॥

વારુણે ચણ્ડિકા પાતુ ચામુણ્ડા પાતુ વાયવે ।
ઉત્તરે ભૈરવી પાતુ ઈશાને પાતુ શઙ્કરી ॥ ૨॥

પૂર્વે પાતુ શિવા  દેવી ઊર્ધ્વે પાતુ મહેશ્વરી ।
અધઃ પાતુ સદાઽનન્તા મૂલાધાર નિવાસિની ॥ ૩॥

મૂર્ધ્નિ પાતુ મહાદેવી લલાટે ચ મહેશ્વરી ।
કણ્ઠે કોટીશ્વરી પાતુ હૃદયે નલકૂબરી ॥ ૪॥

નાભૌ કટિપ્રદેશે ચ પાયાલ્લમ્બોદરી સદા ।
ઊર્વોર્જાન્વોઃ સદા પાયાત્ ત્વચં મે મદલાલસા ॥ ૫॥

ઊર્ધ્વે પાર્શ્વે સદા પાતુ ભવાની ભક્તવત્સલા ।
પાદયોઃ પાતુ મામીશા સર્વાઙ્ગે વિજયા સદા ॥ ૬॥

રક્ત માંસે મહામાયા ત્વચિ માં પાતુ લાલસા ।
શુક્રમજ્જાસ્થિસઙ્ઘેષુ ગુહ્યં મે ભુવનેશ્વરી ॥ ૭॥

ઊર્ધ્વકેશી સદા પાયાન્ નાડી સર્વાઙ્ગસન્ધિષુ ।
ૐ ઐં ઐં હ્રીં હ્રીં ચામુણ્ડે સ્વાહામન્ત્રસ્વરૂપિણી ॥ ૮॥

આત્માનં મે સદા પાયાત્ સિદ્ધવિદ્યા દશાક્ષરી ।
ઇત્યેતત્ કવચં દેવ્યાશ્ચણ્ડિકાયાઃ શુભાવહમ્ ॥ ૯॥

॥ ફલશ્રુતિ ॥

ગોપનીયં પ્રયત્નેન કવચં સર્વસિદ્ધિદમ્ ।
સર્વરક્ષાકરં ધન્યં ન દેયં યસ્ય કસ્યચિત્ ॥ ૧૦॥

અજ્ઞાત્વા કવચં દેવ્યા યઃ પઠેત્ સ્તવમુત્તમમ્ ।
ન તસ્ય જાયતે સિદ્ધિર્બહુધા પઠનેન ચ ॥ ૧૧॥

ધૃત્વૈતત્ કવચં દેવ્યા દિવ્યદેહધરો ભવેત્ ।
અધિકારી ભવેદેતચ્ચણ્ડીપાઠેન સાધકઃ ॥ ૧૨॥

ઇતિ શ્રીરુદ્રયામલતન્ત્રે શ્રીશિવકાર્તિકેયસંવાદે
રુદ્રચણ્ડીકવચં સમ્પૂર્ણં શિવં ભૂયાત્ ॥

Encoded by lalitha parameswari parameswari.lalitha at gmail.com
Proofread by lalitha parameswari, NA

*Shri Rudrachandi Kavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*